MANUSCRIPT NO.	**737**
NAME OF MANUSCRIPT	**Krishna Prem Amritam**
AUTHOR	**Vithaleshwar**
SUBJECT	**Religion**
LANGUAGE	**Sanskrit**
SCRIPT	**Devnagiri**
BRIEF EXPLANATORY NOTE	**It contains song celestial of Krishan Love Lore. The text is written in Sanskrit verse.**

कृष्ण प्रेमामृत

विट्ठलेश्वर

कृष्णाप्रेमामृत ॥ विट्ठलेश्वर
कृत ॥
२ पत्रक ॥ ल० म० १७पं० प्र० पृ०

ह० ल०



137

2

ॐ श्रीकृष्णाय नमः सेयमविरहे वितर्के वरमिह विरहो न संगमस्तस्य एकः स च संगे त्रिभुवनमपि तन्मयं कुरुते यातकाचित्तदा
मकमनाः सा प्रस्थं वर्तमानं न पश्यति हृदयात्कृष्णस्य गुणान्कर्माणि च स्मरन्ती नु त्यजति च तदेवाह एकदेति मनसः वाण्यकृष्णा
निराशार्थं १ कर्षति सर्वासां मनांसि स्वात्मनि १ कृष्णाय स्वनातस्यां रंडः स्वामी १ चिद्दितेपर हितोनिरालोलायाम्यानंदः ३ गाः र
क्षयाभिसरभीश्च विंदते लभ्यते स्वामीत्वमेवमेषामिति ४ गोकुलस्य गोगोपगोपीग्रामस्य दर्शनस्पर्शनस्मरणादिभिरुत्सवरूपः
५ गाः पालयति ६ गोपगोपीनामीशः ७ वल्लवा गोपास्तेषामिंद्रः ८ व्रजस्येश्वरः ९ अनुदिनं नवो नवः १० तरुणो नूतन ग्रोनं

एकदा कृष्णविरहाद्यायंतोप्रियसंगमं मनोवाष्पनिराशार्थं जल्पतीदं मुहुर्मुहुः १ कृष्णः कृष्णेंदुरानंदो गोविंदो गोकु
लोत्सवः गोपालो गोपगोपीशो वल्लवेंद्रो व्रजेश्वरः २ [illegible] नवनीतास्तकृष्णानंदविग्रहः आनंदैकसुखः स्वा
मीसंतोषातपकोशसंश्रः ३ ४ आभीरिकाजनानंदः परमानंदकंदलः ५ वृंदावनकलानाथो व्रजानंगनवां
कुरः ४ ८ नयनानंदकुसुमो व्रजभाग्यफलोदयः प्रतिक्षणातिस्वावदो मोहनो मधुरश्रुतिः ५ २३ ॥

दोविग्रोयस्य ११ आनंदो राधया नित्यविहारात्मकएक महितीयं सुखं यस्य १२ सर्वैश्वर्यमस्यास्य १३ संतोषस्य पोतयोवना
पीयूषः कोशस्तस्य भूरत्नस्थानं १४ आभीरिकाणां गोप्यालासां जनानां आनंद आनंदरूपः १५ परमानंदस्य कंदलो मूलः
१६ वृंदावने कलानां षोडशानां नाथः स्वामी चंद्रः १७ व्रजे गोकुले अनंगस्य नवो नूतनो अंकुरो यस्मात् १८ भ्रमरस्थानीयानां
नयनानामानंदजनकः कुसुमरूपकुसुमः १९ व्रजस्य भाग्यानां फलस्योदयरूपः २० क्षणात्क्षणं प्रतिप्रतिस्वादं ददाति २१ द
र्शनस्पर्शनस्मरणादिभिः सर्वान्मोहयति २२ मधुरा परमरमणीया श्रुतिः कीर्तिर्यस्य २३ ॥



स्तथायानिर्यासः तत्वं तस्य समूहः २४ रमणीयः २५ पणमलाकुलाश्राक्षतिर्यस्य २६ नवीनयौवनेनसंभिन्नोमिश्रः २७ पणा
माया असृतं अपराजितं तस्य रसस्य आकरः खानिः २८ इंद्रनीलमणिवत्स्वच्छउज्वलः २९ दलितांजनवत्सौवीरवत्स्निग्धः ३०
इंदीवरनीलोत्पलं तद्वत्सुंदरः ३१ सजलमेघवत्स्निग्धश्चिक्कणपवसुंदरः सुमांगाविन्यासेवात ३२ कर्पूरागुरुकस्तूरीकुंकुमै

स्तथानिर्यासनिचयःसुंदरः पणमलाकृतिः नवयौवनसंभिन्नः पणामास्तरसाकरः ६ २८ इं
द्रनीलमणिस्वच्छो दलितांजनचिक्कणः इंदीवरस्त्वावसर्पीनीरदस्निग्धसुंदरः ७ ३२ कर्पूरा
गुरुकस्तूरीकुंकुमांगरागधूसरः सुकुंचितकचयस्तालसञ्चारुशिखंडकः ८ ३४ मत्तालिविभ्र
मस्मारिजातपुष्पावतंसकः आननेंदुजितानंतशरणशारदचंद्रमाः ९ ३६ श्रीमल्ललाटपा
टीरतिलकालंकारंजितः नीलोत्पलभ्रूविलासोमदालसविलोचनः १० ३९ ॥

भमानः १

रागानिर्हिलिप्तानिश्रंगानिर्तैर्धूसरो लिप्तांगः ३३ सुकुंचिताः येकचाः कुंतलानितत्रस्त्वस्तोनम्रीभूतः उल्लसन् शोभ्याचारुमनोहरः
शिखंडकोमोरपिच्छाचूडायस्य ३४ मत्तैरलिभिस्तैर्विशेषेणभ्रमंतिपारिजातसमाल्यभूतानिपुष्पाणियत्र ईदृशोवतंसः शिरः क
णिपोर्भूषणंयस्य ३५ आननेंदुनाजिताअनंताः शरणाः शारदाश्चंद्रमसो येन ३६ श्रीमतिललाटेपाटीरश्चंदनस्तस्य तिलकेनअलंक

मारेजितः ३७ नीलयोरुत्पलयोर्भ्रुवोर्विलासो यस्य ३८ मदेन
अलसे विलोचने ३९

आकर्णरक्तसौंदर्यलहरीउक्ताया दृष्टिस्तया मंथरोलसः ४० घूर्णायमाने प्रेमारक्ते नयने यस्य ४१ साचितिर्यक्‌प्रदीर्घत्वांत
त्रविचलनात् स्वरः ४२ अपांगयोरिंगितस्य मनोभिप्रायस्य सौभाग्येन सौंदर्येण तरलीकृतास्सेतनायेन यद्वा अपांगयोः इंगि
तसौभाग्येन अभिप्रायस्य चन्सौभाग्येन तरलीकृते चेतने चित्ते येन ४३ गंडयोः प्रांतलसतयोः कर्णयोर्मकराकृती कुंडले य
स्य ४४ ईषन्मुद्रिते लोले चंचले अरुणे यस्य ४५ सुष्ठु नासापुटेन सुंदरः ४६ प्रसन्नो निर्मलो निरातंको य आनंदस्तेनोपल
क्षितं वदनं यस्य ४७ जगतः आह्लादकं आह्लादजनकं आननं यस्य जगतः आह्लादस्य कानने वनेवा ४८ सुस्मेरो मंदहासस्तेनैव

आकर्णरक्तसौंदर्यलहरीदृष्टिमंथरः घूर्णायमाननयनः साचीनत्वाद्विचक्षणः ॥ ४२ अपांगेंगितसौभाग्यतर
लीकृतचेतनः ईषन्मुद्रितलोलाक्षः सुनासापुटसुंदरः ॥ ४४ गंडप्रांतोल्लसत्कर्णमकराकृतिकुंडलः प्रसन्ना
नंदवदनो जगदाह्लादकाननः ॥ ४८ सुस्मेरामृतसौंदर्यप्रकाशीकृतदिङ्मुखः सिंदूरारुणसुस्निग्धमाणि
क्यदशनच्छदः ॥ ५० पीयूषाधिकमाधीकसूक्तिश्रुतिरसायनः त्रिभंगललिततिर्यक्‌ग्रीवस्त्रैलोक्यमोहनः
॥ ५२ कुंचिताधरसंसक्तकूजद्वेणुविनोदवान् कंकणांगदकेयूरमुद्रिकाविलसद्भुजः ॥ ५५ ॥

अमृतेन तत्सौंदर्येण प्रकाशीकृते दिङ्मुखं येन ४९ सिंदूरादरुणौ सुस्निग्धौ सुष्ठु चिक्कणौ माणिक्यवत् दशनच्छदौ ओष्ठपु
टौ यस्य ५० पीयूषादपि कं यन्माधीकं माधुर्यं यस्याः सूक्त्या तया श्रुतीनां कर्णानां रसायनः रसप्रदः ५१ त्रिभंग्या ललितया हृद्य
त्वं तिर्यग्ग्रीवया त्रैलोक्यं मोहयति यद्वा हृदि पदं त्रिभंगेन ललिता तिरश्ची ग्रीवा यस्य ५२ त्रैलोक्यं वेणुना मोहयतीत्येवं शी
लः ५३ कुंचितयोरधरयोः संसक्तेन कूजन्सन्वेणुस्तेन विनोदो यस्य ५४ कंकणांगदकेयूरमुद्रिकादिभिर्भूषणैर्विलसंतौ भुजौ यस्य ५५ ॥

स्वर्णमये सूत्रे सुष्ठु विन्यस्ते कौस्तुभं तेन आसक्ता ईषत्सक्ता कंधरा ग्रीवा यस्य ५६ मुक्ताहारेण उल्लसद्वक्षः तत्र स्फुरद्दे दीप्य
मानं श्रीवत्सलांछनं यस्य ५७ आसमंतात्पीनं पुष्टं हृदयं यस्य ५८ नीपानां कलकदंबानां माला अस्त्यस्य ५९ बंधुरा मनोहरा उ
२ दरं यस्य ६० सम्यक्वीते वेष्टिते पीते वसने येन ६१ रसनया मेखलया विशेषेण लसंती कटिर्यस्य ६२ अंतरे भवः अंतरीणः
इदं शयोत्तरीयबंधः ऊर्ध्वाच्छादनपटः तस्य स्वप्रपदेन पादाग्रेण आदोलितः ततः उत्चालितः अंचलवस्त्रप्रांतो येन ६३ अरविंदं पद्म
वत्पदौ तयोर्द्वंद्वः तत्र कलक्वणितौ मधुरस्फुटशब्दायमानौ नूपुरौ यस्य ६४ पल्लववत् अरुणौ रक्तौ तेन च माधुर्येण सुकुमारे प

स्वर्णस्रग्विन्यस्तकौस्तुभासक्तकंधरः मुक्ताहारोल्लसद्वक्षः स्फुरच्छ्रीवत्सलांछनः ७ ५७ आपीनहृदयो नीप
मालावान्बंधुरोदरः संवीतपीतवसनो रसनाविलसत्कटिः ८ ६२ अंतरीणोत्तरीयबंधप्रपदादोलितांचलः
अरविंदपदद्वंद्वकलक्वणितनूपुरः ९ ६४ पल्लवारुणमाधुर्यसुकुमारपदांबुजः नखचंद्रजिताशेषदर्पणे
न्द्रमणिप्रभः १० ६६ ध्वजवज्रांकुशांभोजराजच्चरणपल्लवः त्रैलोक्याद्भुतसौंदर्यपरिपाकमनोहरः ११ ६८ सा
नाकेलिकलामूर्तिः परिहासरसार्णवः यमुनोपवनश्रेणीविलासी व्रजनागरः १२ ७२ गोपांगनाजनासक्तो
वृंदारण्यपुरंदरः आभीरनागरीप्राणनायकः कामशेखरः १३

पदांबुजे यस्य यद्वा बंधूकारुणा बंधूकवदरुणो सर्ववत् ६५ नखचंद्रैर्जिताशेषादर्पणाश्च इंद्रमणिश्च तेषां प्रभा येन ६६
ध्वजवज्रांकुशांभोजैः राजंतौ चरणपल्लवौ यस्य ६७ त्रयाणां लोकानां समाहारः त्रिलोकी त्रिलोक्येव त्रैलोक्यं त्रैलोक्ये अद्भु
ते आश्चर्यरूपं यत्सौंदर्यं तस्य परिपाकेन अंतपरिणामेन मनोहरः दृष्टः सन् सर्वेषां मनांसि हरति ६८ साना केलीनां कलाशिता
स्तासां मूर्तिरिव मूर्तिः ६९ परिहासरसार्णवः ७० यमुनायाः उपवनानां श्रेणी तत्र विलासोऽस्यास्य ७१ व्रजे नागरो रसिकजन
ः ७२ गोपांगनानां जने आसक्तिर्यस्य ७३ वृंदारण्यपुरंदरः इंद्रः ७४ आभीराणां गोपानां नार्यः प्रौढांगनास्तासां प्राण

नायकः प्राणपतिः १५ कामकलाकोविदो मिलितो ६६ २

यमुनायाः नौः तरिः तं प्रेरयति गपयति वा नाविकः ११ गोपीनां यमुनायाः पारेऽवारे च कर्णं कृतउद्यमो येन १८ राधायाश्रवरोध
नेरनिर्यस्य १९ कंदवा नाव नेमंदिरः संकेतस्य लंपस्य ८० व्रजयोषितां सदा सर्वस्मिन्काले हृदयः हृदयानंदः ८१ गोपीनां लो
चनानां तारका नेत्रकनीनका प्रतिप्रियइति यावत ८२ जीवनानंदजलक्रीडदेवसिकः रसेचतरः ८३ शशीनंदेकतह हलम
स्यस्य ८४ गोपिकानां कुचयोः कस्तूरी तया पंकिलः आविलः लिप्तदेहः ८५ केलौ गोपीरासकेलौ लालसा इच्छा यस्य ८६
अत्या कुटी कुटीरः अलन्तितस्मास्मो कुटीरस्थ तत्रातिष्ठति ८७ राधायाः सर्वस्वसंपुटः मंजूषा सर्वस्वधानी ८८ वल्लवीनां गो

यमुनानाविको गोपीपारावारकृतोद्यमः राधावरोधनरतः कदंबवनमंदिरः २४ ८० व्रजयोषित्सदाहृद्यो गोपीलोचन
तारकः जीवनानंदरसिकः शशीनंदकृतहल्लो २५ ८४ गोपिकाकुचकस्तूरीपंकिलः केलिलालसः अलन्तितकुटी
रस्थो राधासर्वस्वसंपुटः २६ ८८ वल्लवीवदनांभोजमधुपानमधुव्रतः निगूढरसविद्गोपीचित्ताह्लादकलानिधिः
२७ ९१ कालिंदीपुलिनानंदी क्रीडाताडवपंडितः आभीरिकानवानंगरागभूमिसुधाकरः २८ ९४ विदग्धगोपवनि
ताचित्ताहृतविनोदवान् नानोपायनपाणिस्थगोपनारीगणावृतः २९ ९६ ॥

पीनां वदनानि एव अंभोजानि तेषां मधोर्मकरंदस्य पानेन मधुव्रतः इव मधुव्रतः ८९ नितरां गूढं मानवतीनां अंतउदतो यो रसः तं
वेत्ति ९० गोपीनां चित्तस्याह्लादाय कलानिधिरिव कलानिधिश्चंद्रः ९१ कालिंद्याः पुलिने आनंदो लोकोत्तरानंदोऽस्यास्य ९२ क्री
डायां ताडवेन नर्तने पंडितः वित्तः ९३ आभीरिकानां गोपिकानां नवो नूतनोऽनंगः कामः तस्य रंगभूमौ सुधाया आकरश्चंद्र इव
चंद्रः ९४ विदग्धाः प्रौढाः ये गोपास्तेषां वनिताः स्त्रियः तासां चित्ताकर्तेन मनोभिप्रायेण विनोदोऽस्यास्ति ९५ नानाविधानि
नवनीतशर्करादीनि यानि उपायनानि भेटानि तानि एव पाणौ हस्ते स्थितानि येषां तेषां गोपानां नारीणां गणाः समूहः तेन आ
वृतः ९६

९५

पायावांछाभक्तानां हृदि वर्त्तते तस्याः कल्पतरुरिव कल्पतरुः ९७ कामकलास्वये रसाः तेषु शिरोमणिः शृंगारमूर्तिः ९८ को
टीनां कंदर्पाणां लावण्यसौंदर्यं यस्य ९९ कोटीइन्दुभ्यो ललिता मनोहरा द्युतिर्यस्य १०० प्रतिक्षणं नवीनं मधुरस्यत्कुमस्मः स्वेदो
२ यस्य १०१ प्रेयसीषु प्रेमाणः सञ्चयो यस्य यद्वा प्रेयस्याः प्रेमा तस्य संचयः समूहो यत्र १०२ गोपीनां मनोरथैः स्वस्वाभिप्रायाद्
त्यैः आक्रान्तो विषयीकृतः १०३ नाट्यलीलातास्तु विशारदः प्रवीणः १०४ जगत्त्रयाणां मनसां मोहं स्वमेघ स्वयं गोपनं क
रोति १०५ सन्मथस्य कामस्य मनो मथ्नाति स्वसौंदर्याधिक्येन १०६ गोपीनां वासीं मतिनीतां यच्छद्भावस्य शासत्वं च तेनाभिप्राय
स्य अपेताया परायणः आसक्तः १०७ आगमं प्रति रभसः आवेशो यस्य रसरभात्तु भावे लेख्य तेसान्तिक संचारि भिन्न्यश्यते

वांछाकल्पतरुः कामकलारसशिरोमणिः कोटिकंदर्पलावण्यः कोटीइन्दुललितद्युतिः ३ १०० नवीनमधुरस्वेदः
प्रेयसीप्रेमसंचयः गोपीमनोरथाक्रान्तो नाट्यलीलाविशारदः ३१ ४ जगत्त्रयमनोमोहकरो मन्मथमन्मथः गो
पसीमतिनीशास्वज्ञावाप्येतापरायणः ३२ ७ प्रेमगारभसावेशः प्रमदाप्राणवल्लभः रासोल्लासमदोन्मत्तो राधिका
रतिलंपटः ३३ ११ खेलीलापरिश्रान्तः स्वेदांबुरुचिराननः गोपिकागलसच्छ्रीमान् मलयानिलसेवितः ३४ १५
इत्येवं प्राणनाथस्य प्रेमामृतरसायनं यः पठेच्छ्रावयेद्वापि स वै प्रेमलभेध्रुवम् ३५ इतिश्रीविठ्ठलेश्वरकृतस्य

ला२ प्रेमामृतम् ॥



आविष्टरसरभसः इत्यर्थः १०८ प्रकृष्टो मदो यासां तासां प्रमदानां प्राणेभ्योपि वल्लभः ९ रासस्योल्लासः तस्य मदेनोन्मत्तः १०
राधिकायाः रत्यै लंपटो लोलुपः ११ खेलाक्रीडातस्याः या लीला अद्भुततरव्यवहाररूपाः संवादनधावनाद्याः ताभिः परिश्रान्तः
अलसः १२ स्वेदांबुभिः रुचिरं मनोहरमाननं यस्य १३ गोपिकानां अग्रे गले लसन् चासौ श्रीमान् च १४ मलयानलेन दक्षिण
पवनेन सेवितः यतः स्वरतश्रमेण प्रस्विन्नात्रेणामतिस्तावत् प्रदत्तेन सेवात्रोक्ता १५ प्रेमैव अमृततरसः तस्य अयने समुद्रः ३५

इतिश्रीविठ्ठलेश्वरकृतस्य प्रेमामृतम् ॥ ॥ ॥

Form 20

PANJAB UNIVERSITY LIBRARY

1. Books may be retained for period not exceeding one month by Fellows, Members of the Faculties and Teachers of the University and Colleges and for not more than two weeks by other classes of members.
2. Books may be renewed on request at the discretion of the Librarian. This privilege does not apply to books issued with special permission of the Librarian, as well as periodicals.
3. In case the loan of the book is not renewed, failure to return the book in time will render the borrower to a fine from the date when book was due.
4. Dog-earing the pages of a book, marking or writing therein with ink or pencil, tearing or taking out pages, or otherwise damaging it will constitute an injury to a book.
5. **Any such injury to a book is a serious offence. Unless the borrower points out the injury at the time of borrowing the book, he shall be required to replace the book or pay its price.**

Help to keep the book fresh and clean.

